# Gayatri-rahasya Upanishad

# ગાયત્રીરહસ્યોપનિષત્

## Document Information

Text title : Gayatri Rahasya Upanishad

File name : gaayatriirahasyopanishhat.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic Rishi ??

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : from Adyar Library Unpublished Upanishads

Latest update : Jan. 7, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# ગાયત્રીરહસ્યોપનિષત્

॥ ગાયત્રીરહસ્યોપનિષત્ ॥

ૐ સ્વસ્તિ સિદ્ધમ્ । ૐ નમો બ્રહ્મણે ।
ૐ નમસ્કૃત્ય યાજ્ઞવલ્ક્ય ઋષિઃ
સ્વયંભુવં પરિપૃચ્છતિ ।
હે બ્રહ્મન્ ગાયત્ર્યા ઉત્પત્તિઃ શ્રોતુમિચ્છામિ ।
અથાતો વસિષ્ઠઃ સ્વયંભુવં પરિપૃચ્છતિ ।
યો બ્રહ્મા સ બ્રહ્મોવાચ ।
બ્રહ્મજ્ઞાનોત્પત્તેઃ પ્રકૃતિં વ્યાખ્યાસ્યામઃ ।
કો નામ સ્વયંભૂ પુરુષ ઇતિ ।
તેનાઙ્ગુલીમથ્યમાનાત્ સલિલમભવત્ ।
સલિલાત્ ફેનમભવત્ । ફેનાદ્બુદ્બુદમભવત્ ।
બુદ્બુદાદણ્ડમભવત્ । અણ્ડાદ્બ્રહ્માભવત્ ।
બ્રહ્મણો વાયુરભવત્ । વાયોરગ્નિરભવત્ ।
અગ્નેરોઙ્કારોઽભવત્ । ઓઙ્કારાદ્વ્યાહૃતિરભવત્ ।
વ્યાહૃત્યા ગાયત્ર્યભવત્ ।ગાયત્ર્યા સાવિત્ર્યભવત્ ।
સાવિત્ર્યા સરસ્વત્યભવત્ । સરસ્વત્યા સર્વે વેદા અભવન્ ।
સર્વેભ્યો વેદેભ્યઃ સર્વે લોકા અભવન્ ।
સર્વેભ્યો લોકેભ્યઃ સર્વે પ્રાણિનોઽભવન્ ।

અથાતો ગાયત્રી વ્યાહૃતયશ્ચ પ્રવર્તન્તે ।
કા ચ ગાયત્રી કાશ્ચ વ્યાહૃતયઃ ।
કિં ભૂઃ કિં ભુવઃ કિં સુવઃ કિં મહઃ કિં જનઃ કિં તપઃ
કિં સત્યં કિં તત્ કિં સવિતુઃ કિં વરેણ્યં કિં ભર્ગઃ
કિં દેવસ્ય કિં ધીમહિ કિં ધિયઃ કિં યઃ કિં નઃ કિં પ્રચોદયાત્ ।
ૐ ભૂરિતિ ભુવો લોકઃ । ભુવ ઇત્યન્તરિક્ષલોકઃ । સ્વરિતિ સ્વર્ગલોકઃ ।
મહ ઇતિ મહર્લોકઃ । જન ઇતિ જનોલોકઃ । તપ ઇતિ તપોલોકઃ । સત્યમિતિ સત્યલોકઃ ।

તદિતિ તદસૌ તેજોમય તેજોઽગ્નિર્દેવતા ।
સવિતુરિતિ સવિતા સાવિત્રમાદિત્યો વૈ । વરેણ્યમિત્યત્ર પ્રજાપતિઃ ।
ભર્ગ ઇત્યાપો વૈ ભર્ગઃ । દેવસ્ય ઇતીન્દ્રો દેવો દ્યોતત ઇતિ
સ ઇન્દ્રસ્તસ્માત્ સર્વપુરુષો નામ રુદ્રઃ ।
ધીમહીત્યન્તરાત્મા । ધિય ઇત્યન્તરાત્મા પરઃ ।
ય ઇતિ સદાશિવપુરુષઃ । નો ઇત્યસ્માકં સ્વધર્મે ।
પ્રચોદયાદિતિ પ્રચોદિત કામ ઇમાન્ લોકાન્
પ્રત્યાશ્રયતે યઃ પરો ધર્મ ઇત્યેષા ગાયત્રી ।
સા ચ કિં ગોત્રા કત્યક્ષરા કતિપાદા । કતિ કુક્ષયઃ ।
કાનિ શીર્ષાણિ । સાંખ્યાયનગોત્રા સ ચતુર્વિંશત્યક્ષરા
ગાયત્રી ત્રિપાદા ચતુષ્પાદા । પુનસ્તસ્યાશ્ચત્વારઃ પાદાઃ
ષટ્ કુક્ષિકાઃ પઞ્ચ શીર્ષાણિ ભવન્તિ ।
કે ચ પાદાઃ કાશ્ચ કુક્ષયઃ કાનિ શીર્ષાણિ ।
ઋગ્વેદોઽસ્યાઃ પ્રથમઃ પાદો ભવતિ । યજુર્વેદો દ્વિતીયઃ પાદઃ ।
સામવેદસ્તૃતીયઃ પાદઃ । અથર્વવેદશ્ચતુર્થઃ પાદઃ ।
પૂર્વા દિક્ પ્રથમા કુક્ષિર્ભવતિ । દક્ષિણા દ્વિતીયા કુક્ષિર્ભવતિ ।
પશ્ચિમા તૃતીયા કુક્ષિર્ભવતિ । ઉત્તરા ચતુર્થી કુક્ષિર્ભવતિ ।
ઊર્ધ્વં પઞ્ચમી કુક્ષિર્ભવતિ । અધઃ ષષ્ઠી કુક્ષિર્ભવતિ ।
વ્યાકરણોઽસ્યાઃ પ્રથમઃ શીર્ષો ભવતિ । શિક્ષા દ્વિતીયઃ।
કલ્પસ્તૃતીયઃ । નિરુક્તશ્ચતુર્થઃ । જ્યોતિષામયનમિતિ પઞ્ચમઃ ।
કા દિક્ કો વર્ણઃ કિમાયતનં કઃ સ્વરઃ કિં લક્ષણમ્,
કાનિ અક્ષરદૈવતાનિ ક ઋષયઃ કાનિ છન્દાંસિ કા શક્તયઃ
કાનિ તત્ત્વાનિ કે ચાવયવાઃ ।
પૂર્વાયાં ભવતુ ગાયત્રી । મધ્યમાયાં ભવતુ સાવિત્રી ।
પશ્ચિમાયાં ભવતુ સરસ્વતી ।
રક્તા ગાયત્રી । શ્વેતા સાવિત્રી । કૃષ્ણા સરસ્વતી ।
પૃથિવ્યન્તરિક્ષં દ્યૌરાયતનાનિ ।
અકારોકારમકારરૂપોદાત્તાદિસ્વરાત્મિકા ।
પૂર્વા સન્ધ્યા હંસવાહિની બ્રાહ્મી ।
મધ્યમા વૃષભવાહિની માહેશ્વરી ।
પશ્ચિમા ગરુડવાહિની વૈષ્ણવી ।
પૂર્વાહ્ણકાલિકા સન્ધ્યા ગાયત્રી કુમારી

રક્તા રક્તાઙ્ગી રક્તવાસિનીરક્તગન્ધમાલ્યાનુલેપની
પાશાકુશાક્ષમાલાકમણ્ડલુવરહસ્તા
હંસારૂઢા બ્રહ્મદૈવત્યા ઋગ્વેદસહિતા
આદિત્યપથગામિની ભૂમણ્ડલવાસિની ।
મધ્યાહ્નકાલિકા સન્ધ્યા સાવિત્રી યુવતી શ્વેતાઙ્ગી
શ્વેતવાસિનીશ્વેતગન્ધમાલ્યાનુલેપની ત્રિશૂલડમરુહસ્તા
વૃષભારૂઢા રુદ્રદૈવત્યાયજુર્વેદસહિતા આદિત્યપથગામિની
ભુવોલોકે વ્યવસ્થિતા ।
સાયં સન્ધ્યા સરસ્વતી વૃદ્ધા કૃષ્ણાઙ્ગી કૃષ્ણવાસિની
કૃષ્ણગન્ધમાલ્યાનુલેપના શઙ્ખચક્રગદાભયહસ્તા
ગરુડારૂઢા વિષ્ણુદૈવત્યા સામવેદસહિતા આદિત્યપથગામિની
સ્વર્ગલોકવ્યવસ્થિતા ।
અગ્નિવાયુસૂર્યરૂપાऽऽવહનીયગાર્હપત્યદક્ષિણાગ્નિરૂપા
ઋગ્યજુ સામરૂપા ભૂર્ભુવઃસ્વરિતિ વ્યાહૃતિરૂપા
પ્રાતર્મધ્યાહ્નતૃતીયસવનાત્મિકા સત્ત્વરજસ્તમોગુણાત્મિકા
જાગ્રત્સ્વપ્નસુષુમરૂપા વસુરુદ્રાદિત્યરૂપા
ગાયત્રીત્રિષ્ટુબ્જગતીરૂપા બ્રહ્મશઙ્કરવિષ્ણુરૂપેચ્છા-
જ્ઞાનક્રિયાશક્તિરૂપા સ્વરાડ્વિરાડ્વષડ્બ્રહ્મરૂપેતિ ।
પ્રથમમાગ્નેયં દ્વિતીયં પ્રાજાપત્યં તૃતીયં સૌમ્યં
ચતુર્થમીશાનં પઞ્ચમમાદિત્યં ષષ્ઠં ગાર્હપત્યં
સપ્તમં મૈત્રમષ્ટમં ભગદૈવતં નવમમાર્યમણં
દશમં સાવિત્રમેકાદશં ત્વાષ્ટ્રં
દ્વાદશં પૌષ્ણં ત્રયોદશમૈદ્રાગ્નં ચતુર્દશં વાયવ્યં
પઞ્ચદશં વામદેવં ષોડશં મૈત્રાવરુણં
સપ્તદશં ભ્રાતૃવ્યમષ્ટાદશં વૈષ્ણવમેકોનવિંશં વામનં
વિંશં વૈશ્વદેવમેકવિંશં રૌદ્રં દ્વાવિંશં કૌબેરં
ત્રયોવિંશમાશ્વિનં ચતુર્વિંશં બ્રાહ્મમિતિ પ્રત્યક્ષરદૈવતાનિ ।
પ્રથમં વાસિષ્ઠં દ્વિતીયં ભારદ્વાજં તૃતીયં ગાર્ગ્યં
ચતુર્થમુપમન્યવં પઞ્ચમં ભાર્ગવં ષષ્ઠં શાણ્ડિલ્યં
સપ્તમં લોહિતમાષ્ટમં વૈષ્ણવં નવમં શાતાતપં
દશમં સનત્કુમારમેકાદશં વેદવ્યાસં દ્વાદશં શુકં
ત્રયોદશં પારાશર્યં ચતુર્દશં પૌણ્ડ્રકં પઞ્ચદશં ક્રતું

ષોડશં દાક્ષં સપ્તદશં કાશ્યપમષ્ટાદશમાત્રેયમ્-
એકોનવિંશમગસ્ત્યં વિંશમૌદ્દાલકમેકવિંશમાઙ્ગિરસં
દ્વાવિંશં નામિકેતું ત્રયોવિંશં મૌદ્ગલ્યં ચતુર્વિંશમાઙ્ગિરસ
વૈશ્વામિત્રમિતિ પ્રત્યક્ષરાણામૃષયો ભવન્તિ ।
ગાયત્રીત્રિષ્ટુબ્જગત્યનુષ્ટુપ્પઙ્ક્તિર્બૃહત્યુષ્ણિગદિતિરિતિ
ત્રિરાવૃત્તેન છન્દાંસિ પ્રતિપાદ્યન્તે । પ્રહ્લાદિની પ્રજ્ઞાવિશ્વભદ્રા
વિલાસિની પ્રભા શાન્તા મા કાન્તિ સ્પર્શા દુર્ગા સરસ્વતી વિરૂપા
વિશાલાક્ષી શાલિની વ્યાપિની વિમલા તમોઽપહારિણીસૂક્ષ્માવયવા
પદ્માલયા વિરજા વિશ્વરૂપા ભદ્રા કૃપાસર્વતોમુખીતિ
ચતુર્વિંશતિશક્તયો નિગદ્યન્તે ।
પૃથિવ્યપ્તેજોવાય્વાકાશગન્ધરસરૂપસ્પર્શશબ્દવાક્યાનિ
પાદપાયૂપસ્થત્વક્ચક્ષુશ્રોત્રજિહ્વાઘ્રાણમનોબુદ્ધ્યહઙ્કાર-
ચિત્તજ્ઞાનાનીતિ પ્રત્યક્ષરાણાં તત્ત્વાનિ પ્રતીયન્તે ।
ચમ્પકાતસીકુઙ્કુમપિઙ્ગલેન્દ્રનીલાગ્નિપ્રભોદ્યત્સૂર્ય-
વિદ્યુત્તારકસરોજગૌરમરતકશુક્લકુન્દેન્દુશઙ્ખપાણ્ડુ-
નેત્રનીલોત્પલચન્દનાગુરુકસ્તૂરીગોરોચનઘનસારસન્નિભં
પ્રત્યક્ષરમનુસ્મૃત્ય સમસ્તપાતકોપપાતકમહાપાતકા-
ગમ્યાગમનગોહત્યાબ્રહ્મહત્યાભ્રૂણહત્યાવીરહત્યા-
પુરુષહત્યાઽઽજન્મકૃતહત્યાસ્ત્રીહત્યાગુરુહત્યાપિતૃહત્યા-
પ્રાણહત્યાચરાચરહત્યાઽભક્ષ્યભક્ષણપ્રતિગ્રહ-
સ્વકર્મવિચ્છેદનસ્વામ્યાર્તિહીનકર્મકરણપરધનાપહરણ-
શૂદ્રાન્નભોજનશત્રુમારણચણ્ડાલીગમનાદિસમસ્ત-
પાપહરણાર્થં સંસ્મરેત્ ।
મૂર્ધા બ્રહ્મા શિખાન્તો વિષ્ણુર્લલાટં રુદ્રચક્ષુષી ચન્દ્રાદિત્યૌ
કર્ણૌ શુક્રબૃહસ્પતી નાસાપુટે અશ્વિનૌ દન્તોષ્ઠાવુભે સન્ધ્યે
મુખં મરુતઃ સ્તનૌ વસ્વાદયો હૃદયં પર્જન્ય ઉદરમાકાશો નાભિરગ્નિઃ
કટિરિન્દ્રાગ્ની જઘનં પ્રાજાપત્યમૂરૂ કૈલાસમૂલં જાનુની વિશ્વેદેવૌ
જઙ્ઘે શિશિરઃ ગુલ્ફાનિ પૃથિવીવનસ્પત્યાદીનિ નખાનિ મહતી
અસ્થીનિ નવગ્રહા અસૃક્કેતુર્માંસમૃતુસન્ધયઃ કાલદ્વયાસ્ફાલનં સંવત્સરો
નિમેષોઽહોરાત્રમિતિ વાગ્દેવીં ગાયત્રીં શરણમહં પ્રપદ્યે ।

ય ઇદં ગાયત્રીરહસ્યમધીતે તેન ક્રતુસહસ્રમિષ્ટં ભવતિ ।

ય ઇદં ગાયત્રીરહસ્યમધીતે દિવસકૃતં પાપં નાશયતિ ।
પ્રાતરમધ્યાહ્નયોઃ ષણ્માસકૃતાનિ પાપાનિ નાશયતિ ।
સાયં પ્રાતરધીયાનો જન્મકૃતં પાપં નાશયતિ ।
ય ઇદં ગાયત્રીરહસ્યં બ્રાહ્મણઃ પઠેત્ તેન ગાયત્ર્યાઃ
ષષ્ટિસહસ્રલક્ષાણિ જપ્તાનિ ભવન્તિ । સર્વાન્ વેદાનધીતો ભવતિ ।
સર્વેષુ તીર્થેષુ સ્નાતો ભવતિ । અપેયપાનાત્ પૂતો ભવતિ ।
અભક્ષ્યભક્ષણાત્ પૂતો ભવતિ । વૃષલીગમનાત્ પૂતો ભવતિ ।
અબ્રહ્મચારી બ્રહ્મચારી ભવતિ ।
પઙ્ક્તિષુ સહસ્રપાનાત્ પૂતો ભવતિ ।
અષ્ટૌ બ્રાહ્મણાન્ ગ્રાહયિત્વા બ્રહ્મલોકં સ ગચ્છતિ ।
ઇત્યાહ ભગવાન્ બ્રહ્મા ॥

ઇતિ ગાયત્રીરહસ્યોપનિષત્ સમાપ્તા ॥

*Gayatri-rahasya Upanishad*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*